শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে

# ॥ শ্রী সুন্দরকাণ্ডষোডশী ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী সুন্দরকাণ্ডষোডশী ॥

ততো রাৱণনীতাযাঃ সীতাযাঃ শত্রুকর্ষণঃ।
ইযেষ পদমন্ৱেষ্টুং চারণাচরিতে পথি॥ **1** ॥

যথা রাঘৱনির্মুক্তঃ শরঃ শ্ৱসনৱিক্রমঃ।
গচ্ছেৎ তদ্ৱদ্ গমিষ্যামি লঙ্কাং রাৱণপালিতাম্॥ **2** ॥

অর্থসিদ্ধ্যৈ হরিশ্রেষ্ঠ গচ্ছ সৌম্য যথাসুখম্।
সমানয চ ৱৈদেহীং রাঘৱেণ মহাত্মনা॥ **3** ॥

নমোঽস্তু রামায সলক্ষ্মণায
দেৱ্যৈ চ তস্যৈ জনকাত্মজাযৈ।
নমোঽস্তু রুদ্রেন্দ্রযমানিলেভ্যো
নমোঽস্তু চন্দ্রাগ্নিমরুদ্গণেভ্যঃ॥ **4** ॥

পক্ষী চ শাখানিলযং প্রৱিষ্টঃ
পুনঃ পুনশ্চোত্তমসান্ত্ৱৱাদী।
সুস্ৱাগতং ৱাচমুদীরযাণঃ
পুনঃ পুনশ্চোদযতীৱ হৃষ্টঃ॥ **5** ॥

নমোঽস্তু ৱাচস্পতযে সৱজ্রিণে
স্ৱযম্ভুৱে চৈৱ হুতাশনায।
অনেন চোক্তং যদিদং মমাগ্রতো
ৱনৌকসা তচ্চ তথাস্তু নান্যথা॥ **6** ॥

ৱানরোঽহং মহাভাগে দূতো রামস্য ধীমতঃ।
রামনামাঙ্কিতং চেদং পশ্য দেৱ্যঙ্গুলীযকম্॥ **7**॥

ৎৱমস্মিন্ কার্যনির্ৱাহে প্রমাণং হরিযূথপ।
রাঘৱস্ত্ৱৎসমারম্ভান্মযি যত্নপরো ভৱেৎ॥ **8**॥

ৎৱমস্মিন্ কার্যনির্যোগে প্রমাণং হরিসত্তম।
হনূমন্ যত্নমাস্থায দুঃখক্ষযকরো ভৱ॥ **9**॥

যথা চ স মহাবাহুর্মাং তারযতি রাঘৱঃ।
অস্মাদ্ দুঃখাম্বুসংরোধাৎ ৎৱং সমাধাতুমর্হসি॥ **10**॥

অস্ত্রৱিজ্জযতাং রামো লক্ষ্মণশ্চ মহাবলঃ।
রাজা জযতি সুগ্রীৱো রাঘৱেণাভিপালিতঃ॥ **11**॥

দাসোঽহং কোসলেন্দ্রস্য রামস্যাক্লিষ্টকর্মণঃ।
হনূমান্ শত্রুসৈন্যানাং নিহন্তা মারুতাত্মজঃ॥ **12**॥

ন রাৱণসহস্রং মে যুদ্ধে প্রতিবলং ভৱেৎ।
শিলাভিশ্চ প্রহরতঃ পাদপৈশ্চ সহস্রশঃ॥ **13**॥

ধর্ষযিৎৱা পুরীং লঙ্কামভিৱাদ্য চ মৈথিলীম্।
সমৃদ্ধার্থো গমিষ্যামি মিষতাং সর্ৱরক্ষসাম্॥ **14**॥

তদ্ যথা তস্য ৱিক্রান্তমনুরূপং মহাত্মনঃ।
ভৱত্যাহৱশূরস্য তথা ৎৱমুপপাদয॥ **15**॥

ততো মযা ৱাগ্ভিরদীনভাষিণী শিৱাভিরিষ্টাভিরভিপ্রসাদিতা।
উৱাহ শান্তিং মম মৈথিলাত্মজা তৱাতিশোকেন তথাতিপীডিতা॥ **16**॥

॥ ইতি শ্রী সুন্দরকাণ্ডষোডশী সমাপ্তা॥